भवति, नान्यत्र इति । ततः शौ इति द्वितीयो [1]नियमः । शौ एव सर्वनामस्थाने [2]दीर्घो भवति नान्यत्र इति[3] । सर्वस्योपधालक्षणस्य [4]दीर्घस्य नियमेन निवृत्तिः क्रियते । यस्तु [5]न उपधालक्षणः स भवत्येव । वृत्रहायते । [6]भ्रूणहायते । अथ वा अनुवर्तमानेऽपि सर्वनामस्थानग्रहणे सामर्थ्यादयम[7]विशेषेण नियमः । शिशब्दो हि सर्वनामस्थानं नपुंसकस्य[8], न च तस्यान्यत्सर्वनामस्थानमस्ति इत्यविशेषेण नियमः । [9]तत्र तु नपुंसकस्य इत्येतन्नाश्रीयते । तेनानपुंसकस्यापि दीर्घो न भवति । सर्वनामस्थानसञ्ज्ञाविधाने तु नपुंसकस्य व्यापारोऽस्ति इति तत्र नियमः क्रियमाणो नपुंसकस्य स्यात् ॥

## सौ च । (१३/३८७)

सावसम्बुद्धौ परतः [10]इन्हन्पूषार्यम्णामुपधाया दीर्घो भवति । दण्डी । वृत्रहा । पूषा । अर्यमा । असम्बुद्धौ इति [11]किम् ? हे दण्डिन् । हे पूषन् । हे अर्यमन् ॥

## अत्वसन्तस्य चाधातोः । (१४/४२८)

[12]अतु [13]अस् इत्येवमन्तस्य [14]अधातोरुपधायाः साव[15]सम्बुद्धौ परतः दीर्घो भवति । डवतु – भवान् । क्तवतु – [16]कृतवान् । मतुप् – गोमान् । [17]यवमान् । अत्र कृते [18]दीर्घे नुमागमः [19]कर्तव्यः । [20]यदि हि परत्वान्नित्यत्वाच्च नुम् स्यात्, दीर्घस्य निमित्तम[21]तूपधा विहन्येत । असन्तस्य[22]–[23]सुपयाः । सुयशाः । सुश्रोताः । अधातोः इति किम् ? पिण्डं ग्रसते इति पिण्डग्रः । चर्म वस्ते इति चर्मवः । अनर्थकोऽप्यस्शब्दो गृह्यते, 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' (व्या.प. १३९) इति । अन्तग्रहणमुपदेशप्रयोगैकदेशस्याप्यत्वन्तस्य [24]परिग्रहार्थम्, अन्यथा [25]मतुपो ग्रहणं न स्याद्, उपदेशे [26]रूपनिर्ग्रहहेतौ नायमत्वन्तः इति । असम्बुद्धौ इत्येव, हे गोमन् । सुपयः ॥

## अनुनासिकस्य क्विझलोः क्ङिति । (१८/२६६६)

अनुनासिकान्तस्य अङ्गस्य उपधायाः दीर्घो भवति क्विप्रत्यये परतो झलादौ च क्ङिति । प्रशान् । प्रतान् । झलादौ किति – शान्तः । शान्तवान् । शान्त्वा । शान्तिः । ङिति खल्वपि – शंशान्तः । तन्तान्तः । यङ्लुगन्तादयं तस् । अनुनासिकस्य इति किम् ? ओदनपक् । पक्वः । पक्ववान् । क्विझलोः इति किम् ? गम्यते । रम्यते । क्ङिति इति किम् ? गन्ता । रन्ता ॥

---

1. योगः सोऽपि नियमार्थः ह. 2. परतः इत्यधिकम् ह. 3. अथवा सर्वनामस्थाने इति निवृत्तमेतत् ।
तेन इन्हन्पूषार्यम्णां उपधायाः चानेन दीर्घो भवति नान्यत्र इति इत्यधिकम् ड. फ. 4. दीर्घस्य
नास्ति फ. 5. अनुपधालक्षणः फ. 6. उदाहरणमिदं नास्ति फ, भ्रूणायते ह. 7. अविशेषे क.
8. एव इत्यधिकम् ड. 9. तत्र–स्यात् नास्ति ह. 10. इन्हनादीनाम् फ. 11. एव फ. 12. असम्बुद्धौ
इति वर्तते इत्यधिकम् ह. 13. अस् नास्ति फ. 14. धातुर्वजितस्य फ.ह. 15. सम्बुद्धिवर्जिते ह. 16. भुक्त–
वान् ह. 17. उदाहरणमिदं नास्ति फ. 18. दीर्घत्वे ब.क.ड.ह. 19. नास्ति फ, भवति ह. 20. यदीह ह.
21. अनुपधा क. 22. खल्वपि इत्यधिकम् फ. 23. सुवयाः ह. 24. परिग्रहणार्थं च. 25. हि इत्यधिकम्
फ. 26. तूपनिग्रहहेतौ ह.